गजवत्प्रेक्षणीयः॥

२

सावात। अथवा वक्तुमारंभ्य श्लोकेन गर्भाधानक्षणपरिचयादितिवाक्येन गर्भसंज्ञाहेतुप्रादानमनर्थकं स्यात्। केतककुसुमजननकारणस्य शाद्विषिलेष
मुल्लासः कीदृशस्य अनुचरः अंतर्बाष्पः अंतर्मध्ये बाष्पा अश्रूणि यस्य सः शोकजलस्तंभितगलसंरणिरित्यर्थः। अथवा बाष्पः उष्मा यस्य तं सं तस्य स इत्यर्थः अथ जं
लददर्शनमात्रेण कस्मात् स्यात् तर्बाष्पः तंसोध्याने त्रेत्याह। अथुमे वार्थं अर्थं तिरेण इत्ययति मेघालोके सुखिनोपि जनस्य प्रियजनसंयोगचतोपि मनो
न्यथा वृत्तिस्तवति कच्चिंमेघागमः सोह व्यक्ति। वर्षासमयं आलोक्य स्वस्व प्रियं कंठंते। कंठाश्लेषप्रणयिनि किं कंठाश्लेषप्रणयो विद्यते यस्य स कंठाश्लेष
प्रणयी तस्मिन्नमस्तु जने इत्यस्य संस्थे किं पुनर्वाच्यं। वियायानस्यादि सुवितं मम संदेदानमिति। अर्थांतरन्यासोऽलंकारः॥३॥ सत्रेत्यादि॥ स
यक्षः तस्मै मेघाय स्वागतं व्याजहार। कथं सवतिप्रीतिप्रमुखवचनं प्रीत्या प्रमुखवचनं यत्र तत्र प्राधीति पे सलवचसा सुस्वागमवादवार्त्तामिष्टं क्षितिसाव
स इंद्रस्य नोपि कुत्रालं ते सर्वं च विद्यमा। तामिति। किं विशिष्टः सकामी। प्रीतः मत्स्ययोजनम सानुष्टास्यतीति हृष्टः किं विशिष्टाय मेघाय। कल्पितार्घाय। कुटजा
नां कुसुमानि कुटजकुसुमानि तैः कीदृशैः कुसुमैः प्रत्यग्रैः नूतनैः अनेन मेघागमे कुटजाः पुष्यंतीति तावः सयक्षः किंकरिष्यन् जीमूतेन मेघेन स्वकुशलम्
यीस्वकुलम तदुदंतं प्रवृत्तिं वार्त्तां चापयिष्यन्। किमर्थं जीवितालंबनार्थं दयिताया जीवितालंबनं प्राणसंधारणं अर्पयते वार्त्तापरिबोधनाद् हृदयस्यापि समाश्वासो
जायते। कुसतिनभसि आकाशे प्रत्यासन्ने निकटवर्तिनि सति। श्रावणस्य जलदे जलधरा विंतं वद्यात्। विरहिणां जीवितं संशयकुलामधिरोहतीति सदा
लंबनेदेउः अत्र हेतुरलंकारः॥४॥ धूमज्योतिः सलिलमरुतामित्यादि। यद्यस्मात्कौतुकात् संशयमेव प्रार्थयते स्म। किंकुर्वन् इति अग्रे वक्तुमारंभ्य सुकुमार पर्या
कुलवात्। अपरिगणयन् अविचारयन्। इतीति किं मेघः क्व संदेशार्थाः क्व संदिश्यंत इति संदेशा उच्यते अर्थाश्च संदेशस्वरूपा विधेया इत्यर्थः। किं विशिष्टो मेघ
धूमज्योतिः सलिलमरुतां। धूमश्च ज्योतिश्च सलिलं च मरुच्च ते तथा तेषां। सन्निपातः समवायः मेलापकः अमीषां अचेतनानां प्रत्येकमुपादानं मेघस्यैकं ताचे
तनप्रतिपादनार्थं क्व वर्तंते। किं विशिष्टाः संदेशार्थाः पटुकरणैः प्राणिभिः प्रापणीयाः प्रापयितुं शक्याः ये किल सामान्यो प्राणिभिरपि न किं तु सर्वेंद्रियपाटवयु
क्तैरेव प्रापयितुं शक्यंते। तान् संदेशार्थान् अयं मेघश्चेतनाविकलः कथं नेष्यतीति पर्यालोचयन्। द्वितीयस्मात्कारणात् कामार्त्ता हि प्रकृतिरूपाश्चेतनाचेतनेषु प्रकृ
तिरूपणास्तवंति। प्रत्यक्तत्वास्त्रावेन रूपणामनुमानात्रिविध परापदार्थः अयमति पाप। अमी कार्यक्रमो हमोयं विवार्यैव यथा चेतने स्तथा चेतनेषु पि

[illegible]

प्रवर्त्तंते स्वीकारपरा भवंतीति भावः यद्वा रुक्परोलरूतया दरिद्रः ततः प्रकृतौ स्वभावविषये कृपणा चेतनाचेतनस्वभावपरिज्ञानविकला इत्यर्थः
अर्थांतरन्यासमलंकारः ॥५ जातमिति ॥ अहो जलद त्वां सर्वतं पुष्करावर्त्तकानां मेघविशेषाणां वंशे अन्वये जातं उत्पन्नं अहं इति शेषः अवैमि जा
नामि ॥ जलं ददातीति जलदः तस्य संबोधनं विधीयते ॥ पुष्करं पानीयमावर्त्तयंतीति यथाकामं पृथिव्यां भ्रमयंतीति जगत्येति करणात्वमेतेषां उत्पत्ते
किं विशिष्टे वंशे भुवनविदिते भुवने त्रिभुवने विदिते विख्याते भुवनविदिते तस्मिन् ॥ किं विशिष्टं त्वां सर्वतं ॥ मघोनः शक्रस्य इंद्रस्य प्रकृतिपु
रुषं प्रधानपुरुषं अमात्यपुरुषं ॥ अत एव इंद्रो वै वर्षतीति वेदवाक्यं प्रवर्त्तते ॥ पुनः किंभूतं त्वां सर्वतं ॥ कामरूपं कामं रूपं धारयतीति तथोक्तं ॥ मनो इच्छे
दं अत एव त्वमेव मेघ इति सत्तामिम विवक्षमाणमनुयुगं स्यात् ॥ विश्वोपकारिणां मेघानां कुले प्रसूते तेन कारणेन त्वयि अर्थित्वं याचकत्वं अहं गत
कथंभूतोऽहं ॥ दूरबंधुः दूरे बंधुर्भार्या यस्य स दूरबंधुः विप्रकृष्टभार्यः शब्दावादत्र बंधुशब्देन कलत्रमेव गृह्यते ॥ कस्मात् विधिवशात् दैवपारतं
त्र्यात् ॥ अथवा बंधुर्बंधुजनः यदि कश्चित् स्वजनोऽपि समीपवर्ती भवति ॥ तदा तमेव योजयामि ॥ परं दैवादेक एवाहमत्र तेन त्वां याचयामीत्यर्थः ॥ न चेत
दयुक्तं ॥ यत अधिगुणे गुणाधिके पुंसि याच्ञा प्रार्थना मोघापि निष्फलापि वरं श्रेष्ठा प्रवर्त्तते ॥ अधमे नीचे तु लब्धकामापि पूर्णाभिलाषापि न व
रं मेघाः ॥ विशेषमोघापि वरं लब्धकामापि न वरमिति कोऽर्थः यद्यधिकगुणाय प्रार्थितो न ददाति ॥ तदा स एव वचनीयता ॥ न याचितुरधमात्तु लब्धकामो
ऽपि याचको निंद्यत एवार्थांतरन्यासोऽलंकारः ॥६ संतप्तानां त्वमसि शरणमित्यादि ॥ यत्तदोर्नित्यसंबंध इति यत् यस्मात्कारणात् संतप्तानां
पुरुषाणां त्वं शरणमसि ॥ कुत्र वनं व्याप्य स्वक मन्येषामपि ॥ पर्वतवृक्षादीनां दवदहनदह्यमानानां त्वमेव निर्वापयिता ॥ अहमपि वि
रहसंतप्तोऽस्मि ॥ तत्तस्मात्कारणात् हे पयोद हे मेघ मम प्रियायाः संदेशं हर नय प्रापय ॥ स्वयमगमने कारणमाह ॥ किं विशिष्टस्य मे मम
धनपतिक्रोधविश्लेषितस्य ॥ धनपतेः धनदस्य यो सौ क्रोधः तेन धनपतिक्रोधेन विश्लेषितो वियोजितः धनपतिक्रोधविश्लेषितस्तस्य ॥ हे
मेघ ते त्वया यक्षेश्वराणां अलका नाम वसतिः गंतव्या यातव्या ॥ किं विशिष्टा अलका नाम ॥ बाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या ॥ अ
नेन नितरं निवासी सकलजन वसस्तोदरस्मिन्निक्षतितदीयहरशिरश्चंद्रिकया धौतानि नितमां विनीस्वपि निरस्त मोमलादि हर्म्याणि यस्याः सा

मेघरूपं

×गमनीय संवादया आउ. रविः वहिरालिंगनादिना। आवंदनार्थः ×६ ×सामवरणे ×७ ×स्वस्थ देव वर्द्धमान वलोत्सवनात् ×२

×... वनस्व स्नेहव्यक्तिर्भवति जायते। किं रूपा मंत्रो न वेलापकं पलायमान्। संवतः किं कुर्वंतः उत्तं तत्प्रवाल निश्वासं मुंचत उष्णमनः किंभूतं चिरविरहजं। चिरकालवियोगजातं उत्तरं। मित्रदर्शनपरस्परसंस्कार्यस्य

तथा अनेन चातिइज्ञानकथनं रश्वानदीश्वरदर्शनेनलासप्रलासनं च व्यज्यते। अत्र हेतुरलंकारः॥ ७ ग्रामारूढं पवनपदवीमित्यादि॥ हे वारिद

त्वां संवतं पवनपदवीं गगनमारूढं पथिकवनिताः प्रेक्षिष्यंते। आलोकयिष्यंते॥ ताः किं कुर्वंत्यः आस्थ संतः स्वस्थाः संवत्यः कस्मात् प्रत्ययात् निश्चयात् स्व

वत्पं मेघागमे प्रियः प्रत्यागवति। उक्तं नेकार्थे प्रत्ययो विस्वाससपथ ज्ञाननिश्चयाद्दिषुयतः कस्मात् तिधारोऽपि त्वयि सन्नद्धे त्वयुणित सुरधनुस्तडित्व

तागर्जितादि सा मश्रीके विरहविधुरां वियोगाकुलां प्रेयसीं उपेक्षेत। विरहयेताय दि मादृशोऽन्यो ऽपि पराधीनो न भवेत्। स्वाधीना हि कांताः तिः सद्वरमम

णात्प्रावृषमतिवाहयंति। मत्सदृशा दयं आश्रिता एव मात्ोपधारिकाः। अत्र व्यतिरेको ऽलंकारः॥ ८ आपृच्छस्व प्रियसखममुमित्यादि॥ इदानीं प्रायेणोपतेदेशातामह

॥ हे मेघ अमुं शैलं पर्वतं चित्रकूटं आपृच्छस्व मुकलापय। किं विशिष्टं अमुं पर्वतं। प्रियसखं प्रिय स्यासौ सखा च सतथा तं। इष्टमित्रं पुनः कथंभूतं तुं

गं उच्चैस्तरं पुनः किं विशिष्टं शैलां मेखलासु नितंबप्रदेशेषु रघुपतिपदे रामपादैः अंतिविंवितैरं कितं विह्नितं। अनेकार्थः पदस्थानेवाक्ये पादे पदे वि

ह्नेत्यादि। किंभूतैः रघुपतिपदैः पुंसां पुरुषाणां वंद्यैः नमस्कारार्हैः इतिपावनोक्तिः। यस्मात् काले काले सर्वस्मिन् समागमसमये त्वया सह संयोगमेत्य

चिरविरहजं बाष्पमुष्णं त्यजतः स्नेहव्यक्तिर्भवति स्निह्यतद्भावः पर्वतादिजलदद्वयस्य स्निग्धस्तवं ति। एतदेव सखित्वं यच्चिरेणसुहृदि दृ

ष्ट्वा बाष्पस्वेदो जायते। अथवा अन्योपि यः किल चिरविरहदुःखितो भवति। तत्संयोगे सति उष्णं बाष्पं अश्रु मुंचति। संयोगमेत्येति बाष्पमोक्षापे

क्षं पौर्वकाल्यं स्नेहक्रियाप्रेक्षया नवद्रमेकाकी व्रजन्न विषीदतीति श्रुतनिमित्तकथनेनोत्साहयन्नाह॥ ९ मंदं मंदं नुदति पवनः॥ हे घन यथा पवनो

नुकूलः त्वां संवतं मंदं नुदति प्रेरयति। दृष्टानुगामी प्रेरकूलो गतिश्चानुकूलोऽत्रैव यतश्च समुच्चयेन केवलं वायुर्नुदति। वक्ष्यतः वातकोऽपि

दकः मधुरं अदीप्तस्वरं यथा स्यात्तथा नदति शब्दायते। किं विशिष्टः चातकः वामः वामस्तारा श्रितः पुनः किंभूत चातकः स्तोयगृध्नुः तोयाभि

लाषुकः एवंविधः पवनः पक्षी च गमने शुभः इति शकुनविज्ञया। नूनं निश्चितं संवतं त्वां खे आकाशे बलाकाः विसकंठिकाः सेविष्यंते। किं विशि

ष्टाः बलाकाः आबद्धमालारचितपंक्तयः अथवा आबद्धमालारचितपंक्तयः कुसुममौक्तिकादिदामसादृश्येन पतिमत्तिसरंत्यपरापि प्रवृत्तापदर्शिन्य

स्तुकण्ठेना कथंभूतं संवतं। नयनसुभगं दर्शनीयं कस्मात् गर्भाधानक्षणपरिचयात्। गर्भस्य आधानं स्थापनं तदेव क्षणः उत्सवः तेन परिचयः तस्मा

मेघदूतटी०

ताइति गर्भाधानोत्सवो नवदागमे तासां भवतीति। चिरपरिचयात् गर्भाधानं च महोत्सवानां महामुत्सवः यत्समागमे महोत्सवो भवति को
नाम तस्य सेवां न कुर्यादिति। अत्रानुमानमलंकारः॥१०॥ तां चावश्यमिति। च शब्दः समुच्चये। न केवलं मार्गे बलाकास्त्वां सेविष्यन्ते। तथापि तद्
स्तावादेव शकुनसद्भावात् अविहतगतिः अभग्नप्रकोया इति स्खलितगमनस्त्वं भ्रातृजायां अवश्यं निश्चितं द्रक्ष्यसि। अवलोकयिष्यसि
भ्रातृजायेति च मदीयो बंधुरिति प्रकारांतरेण ज्ञापनाय वचनं। कथंभूतां तां। साध्वीं एकपत्नीं एकस्यायं भर्तुः किं विशिष्टां दिवसगणनातत्प
रां एतावंति दिनानि व्यतीतानि इयंति अवशिष्यंते चेति तत्परा। अव्यापन्नां जीवंतीं। एतेषां द्वयानामपि विशेषणानां कार्यकारणभावः यत एव पत्नी ततो दिव
सान् गणयति एवं चेन्नास्ति अत्र स्थं जीवंतीति अमुमेवार्थं द्रढयति। हि यस्मात् आशाबंधः वांछितसाध्यप्राप्तिसंभावना बध्यते अनेनेति संबं
धः आशाबंधः कर्ता अंगनानां हृदयं कुसुमसदृशं कुसुमसुकुमारं प्रणयि स्नेहवत् विप्रयोगे सति सद्यःपाति तत्कालमेव पतनस्वभावं प्रायः [illegible]
कल्पेन रुणद्धि विरहदुःखितं मरणाध्यवसायात् निवारयतीत्यर्थः अयमद्यपि पतत् रज्जादिबंधनैर्धार्यते इत्युक्तिलेशः केचित् सद्यःपातिप्रण
यीति विश्वंतितत्रसंगतं अत्रानुमानमलंकारः॥११॥ कर्तुं यच्चेति। हे मेघ एकाकिनः किल मार्गे गमनमसांप्रतमिति सहायसंपत्तिं दर्शयन्नाह॥
भवतो नव राजहंसाः श्वसिताः पक्षिणः सूक्ष्म एव रराणावदनाः सहायाः संपत्स्यते। अग्रेसरा भविष्यंति। राजपदविशेषणेन अमीषां उत्तमत्वं सूचि
यादितं उत्तमेन सह संग एव श्रेयान्। कथंभूताः पक्षिणः सहायकत्वेन उपपन्नाः। व्योमगमनगतिस्तेषां गगनगामिनो अत एव सहायसंयुक्ता हंसाः ते
कस्मात् सहायिकत्वेनोपपन्नाः सत्यं। त्वं च जलधरस्ते च जलरसविनः इति समानशीलव्यसनिनां सख्यं व्याख्यातं न तु मिः पाथेयान्नं पथिहिता।
त्वं दुर्निवारं एतन्निराशार्थं कथयति। बिसकिसलयच्छेद इत्यादि। बिसानां मृणालानां किसलयानि अग्राणि तेषां छेदाः खंडानि तान्येव पाथे
यं पथि हितं संबलं येषामिति। परिचयमात्रेण अमी मया सह कथं आगमिष्यंतीत्युक्तं॥ आकैलाशमिति। कैलाशं यावत् कथंभूता हं
साः मानसोत्काः प्रावृषि विरला मानससरोऽनुसरंतीति प्रसिद्धिः अमी तत्र उत्कलिकायामपि किं कारणमित्याह॥ तव तव विधं गर्जितं श्रुत्वा।
कीदृशं गर्जितं। यत्र महीं [illegible] सफलां उच्छिलींध्रातपत्रां कर्तुं प्रभवति। उच्छिलीन्ध्राणि भूमिस्फोटानि तान्येव आतपत्राणि

यस्याः। एतेन मेघस्य श्लाघा॥ यस्य आज्ञामात्रमपि वसुंधरायां एवं विधां संपदमादधाति। तस्याज्ञां पारे किं न विधास्यतीति। चकारः क्रियासमुच्चये। न केवलं
मरालान् नुकंवयति। भद्री एवं विधां च विभ्रद्रे॥ ११ मार्गं तावदित्यादि॥ हे जलद तावत्तावत् ग्राहक मत्सन्देशं मे मम कथयतः गदतः सतः मार्गं पंथानं
शृणु आकर्णय। येन पथा त्वं गमिष्यसि। तं मार्गं शृणु। किं विशिष्टं मार्गं तत्प्रयाणानुरूपं तव गमनयोग्यं। हे जलद तदनु पश्चात् मार्गश्रवणादनु
पश्चात् मे मम संदेशं श्रोष्यसि निशामयिष्यसि। किं विशिष्टं संदेशं श्रोत्रपेयं आदरश्रवणीयां श्रवणसुखदमित्यर्थः। हे जलद त्वं खिन्नः सन् यत्र
यस्मिन् मार्गे खिन्नः खिन्नः सन् खेदितः खेदितः सन् गंता आसियाता असि। किं कृत्वा शिखरिषु पर्वतेषु पदं स्थानं धाप्य। अन्योपि पथिकः खिन्नः सन् सिष्य
रिषु पर्वते ... पदं स्थानं निवेश्य पातह त्वद्वं। पुनः किं कृत्वा। क्षीण क्षीणः सन् पुनः स्रोतसां निर्झराणां नदीनां पयो जलं उपभुज्य पीत्वा। किं विशि
ष्टं पयः परिलघु निर्मलत्वात् लाघवोपेतं। अन्योपि क्षीणः श्रोतो जलं पिबति। स्रोतांसि स्रोत्रस्य प्रवाहा नदी न पुनः नदी पर्यायः॥ १३ अद्रेः शृंगमित्या
दि॥ इतः अस्मात् स्थानात् रामगिरिलक्षणप्रदेशात् उदङ्मुखः खं आकाशं प्रतिगच्छ। किं विशिष्टः सन् त्वं उदङ्मुखः उत्तराभिमुखः उत्तरमुखं यस्य स उ
दङ्मुखः उत्तरा दिगस्ति मुखे वा। कस्मात् सरसनिचुलात् सरसवेतसवृक्षसंकुलात्। किं कुर्वन्। पथि मार्गे स्थूलहस्तावलेपान् पीवरकरि
यहणान् परिहरन् त्यजन्। केषां दिङ्नागानां दिग्गजानां। पुनः किं विशिष्टस्त्वं। मुग्धसिद्धांगनाभिः मुग्धा भूता सिद्धांगना मुग्धसिद्धां
गनास्ताभिः तथाकृतानि चकितचकितं यथा स्यादेवं तथा हृष्टो माद्रेः इष्टोत्कर्षः किंस्वित् ताभिः सिद्धांगनाभिः किंस्वित् ऊर्ध्वं नीताभिः किंच
अस्य दिति विकल्पे पवनः सततगतिर्मातरिश्वा अद्रेः पर्वतस्य शृंगं सानु किं हरति नयति। अतो हेतोः ऊर्ध्वं नीताभिः॥ १४ रत्नच्छायेत्यादि॥
... ... मुखमस्ति नव ... सान्तापशमनं तोदं पलोनयत्रादि॥ हे जलधर आखंडलस्य इंद्रस्य एतत् धनुः पुरस्तात् अग्रतः खधनु
खंडं ... उदञ्चते। कस्मात् वल्मीकाग्रात्। पिपीलिका विकारो विकृतो मृत् संचयविशेषो वल्मीकः तस्य अग्रं वल्मीकाग्रं तस्मात् वल्मीका
ग्रात्। उत अथवा। वल्मीकः सजललोघनः तस्मात् उदच्चते। तत् धनुः कमिव प्रत्यहं रत्नच्छायाव्यतिकरः ... रत्नानां मणीनां छाया कांत

यः तासां व्यतिकरः मिश्रीभावः सद्भावः येन धनुषा तेन तव वपुः शरीरं श्यामं हरिद्वर्णं अतितरां अतिशयेन कांतिं द्युतिं आपत्स्यते ल
प्स्यते। केनेव बर्हेणेव। यथा मयूरस्य पिच्छेन विष्णोर्नारायणस्य द्युतिः उत्पद्यते। किं विशिष्टस्य विष्णोः गोपवेषस्य वल्लववेषस्य गोपा
लाः किल कलितचेतसा किंकिपिच्छपरिच्छदं विलुंच्य आद्रियंते। किंभूतेन बर्हेण। स्फुरितरुचिना। स्फुरिता देदीप्यमाना रुक् कांतिर्यस्य स तथा
विधः तेन। स्त्रैतेन प्रोल्लसितकांतिना। न केवलं पथि प्रस्थितस्य तव शोभालाभ एव विषयोपसर्गोपि। लिखिष्यते तद् दर्शयितुमाह।। १५।। त्वय्या
यत्तमित्यादि।। हे मेघ लघुगतिः सत्वरगतिः सन् त्वं भूयः पुनरपि पश्चात् उत्तरेण उत्तराभिमुखेन व्रज गच्छ। किं कृत्वा मनाक् किंचित् मालं ग्रामा
तराटवीं आरुह्य। तस्योपरि स्थित्वा। किं विशिष्टं मालं। सद्यः सीरोत्कषणसुरभि। सद्यः तत्क्षणं सीरोत्कषणं लांगलमुखोत्खननं तेन सुरभीणि सुगं
धीनि यत्र तत्तथाविधं। किं विशिष्टः त्वं जनपदवधूलोचनैः ग्रामतरुणीलोचनैः पीयमानः सादरमालोक्यमानः अत्यादरावलोकनेन पान
मुच्यते। किं विशिष्टैर्लोचनैः भ्रूविकारानभिज्ञैः भ्रूविलासमुग्धैः [illegible] पुनः किंभूतैर्लोचनैः इति हेतोः प्रीतिस्निग्धैः प्रीत्यास्नेहेन स्निग्धानि प्री
तिस्निग्धानि तैः प्रीतिस्निग्धैः।। अस्माकं [illegible] मिति। प्रीतिदाड्यैः इतीति किं कृषिफलं कर्षणस्य फलं त्वयि आयत्तं। भवति त्वदधीनं भव
ति धान्यनिष्पत्तिरिति भावः।। १६।। त्वामासारेत्यादि।। पथि विश्रामस्थानकथनेन अमुं श्लोकं कथयन्नाह।। हे मेघ सानुमान् आम्रकूटः पर्वतो ना
म त्वां नवं साधु शोभनं यथा स्यात् तथा मूर्ध्ना मस्तकेन शिरसा वक्ष्यति धारयिष्यति। मूर्ध्ना पदेन आदरप्रतिपादनं। किं विशिष्टं त्वां। आसार
प्रशमितवनोपप्लवं। आसारेण वेगवद्वर्षणेन प्रशमितो उपनीतो वनानां तदाश्रितकाननानां उपप्लवो दावपावकः प्रशमो येन स तं। एतेनास्य
उपकारकारणं भणितं पुनः किंभूतं त्वां। अध्वश्रमपरिगतं। मार्गखेदव्याप्तं। अमुमेवार्थं स्पष्टेनार्थेन स्पष्टयति। कविः क्षुद्रोपि लघुरपि मित्रे
सुहृदि आश्रयसमागते सति संश्रयाय निवासाय विमुखः पराङ्मुखो न भवति। न जायते। कया प्रथमसुकृतापेक्षया। प्रथमसुकृतस्य पूर्वोप
कारस्य अपेक्षा तया प्रथमसुकृतापेक्षया। सर्वसुकृतासेवनादि वर्तितया तेन प्रकारेण उच्चैः उन्नतो यः स किं विमुखो न

मालेम

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः। न क्षुद्रोपि प्रथमसुकृतापेक्षया संश्रयाय प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः १७

॥१७॥ अथ त्वां तं आदेशं जलद आम्रकूटः सानुमान् उच्चैः शिरसा मस्तकेन वक्ष्यति धारयिष्यति किं भूतं त्वां अध्वश्रांतं मार्गखिन्नं पुनः कथंभूतं त्वां तस्य सुखमागतं। क संलग्नः आम्रकूटः स्नाघ
मानः श्लाघमानः हे मेघ अपि तस्य आम्रकूटस्य नैदाघमग्निं ग्रीष्मकालीनं दावानलं आसारेण वेगवद्वृष्ट्या शमितः एवं मन्ये सुक्रोयमर्थः किं यस्मात् कारणात् उत्तमानां संपदः आपन्नानि श्रमतफ
लानि भवंति अथवा पावांतरं सज्जावाङः फलति निविरेणोपकारो मनःसु इति वा सङ्गतः कारणात् महत्सु उपकारः चिरेण न फलति तत्काल मेव फलति किं भूतः उपकारः सज्जावाङः ॥पाठांतरं॥१८॥

वतिन्नसवती त्वयि संकिं अनु विनमावरिष्यति नेत्यर्थः ॥१८॥ छन्नोपांतः इत्यादि ॥ जवद्भश्चयदानैरन्नतोयपक्वोपांतः सावयवाद्ध ॥ हे मेघ अच
लः आम्रकूटः नूनं निश्चितं अमरमिथुनप्रेक्षणीयां देवदेवीयुगलानां दर्शनयोग्यं अवस्थां यास्यति प्राप्स्यति। किं विशिष्टः अचलः छन्नोपांतः
आदितपर्यंतः कसति। त्वयि सवति शिखरं तुंगं आरूढे सति। किं कानकाम्रैः वनमध्याम्रवृक्षैः कः चंचलतेकाननकाम्रैः परिणतफलद्योतिभिः।
पाकपिंगरवफलैः शोभायमानैः किं विशिष्टे त्वयि। स्निग्धवेणीसवर्णे कांतिमत्कबरीसमाने अपि आम्रकूटः कस्य। भुवः स्तन इव पयोधर इ
वा। किं विशिष्टः किं नता स्तनः मध्ये श्यामः कृष्णः चूचुकप्रदेशो यस्य सः पुनः किं भूतः शेषविस्तारपांडुः शेषविस्तारेण पांडुरः पांडुरवर्णः मध्यादवशिष्ट
परिणाहस्तागगौरः ॥१९॥ स्थित्वेत्यादि ॥ घ भगवन् वस्तुदर्शनमस्योपदिशन्नाह ॥ तस्मिन् गिरेरनंतरं पंथानं अतिक्रांतः सन् हे मेघ रेवां नर्मदां नाम
नदीं द्रक्ष्यसि अवलोकयिष्यसि। किं भूतः तस्मिन् आम्रकूटे वर्तस्थित्वा उषित्वा। किं विशिष्टे तस्मिन्। वनचरवधूभुक्तकुंजे। किरातांगनासेवि
तलतापिहितघनप्रदेशेषु क्षणमात्रं स्थित्वा। किं विशिष्टः त्वं तोयोत्सर्गद्रुतउदकत्यागात् द्रुततरगतिः त्वरिततरगमनः। किं विशिष्टे
तस्मिन् उपलविषमे नीचोच्चपाषाणविषमे। पुनः किं भूतं तस्मिन्। विंध्यपादे विंध्याद्रिपर्यंतनगे। किं भूतां रेवां। विशीर्णां खंडशोगतां। उत्प्रेक्षते गजस्य
अंगे रचितां भक्तिच्छेदैरिव। विच्छित्तिपत्रैस्तंगैरिव। एतेन विंध्यपादावस्थानेन सिंधुरत्वाधारोप। तद्दंतोभासित्व ति
पत्रावल्ली ग्राह्य स्य प्रकाशनेन रेवायाः रामणीयकं अवलोक्यमानं यो कं ॥२०॥ तस्यास्तिक्तैरित्यादि ॥ हे घन हे मेघ तस्याः रेवायाः नद्याः तोयं जलं ग
दीत्वा आदाय गच्छेः यायाः। किं विशिष्टं तत्तोयं तिक्तैः तिक्तरसैः वनगजमदैः काननकरिमदैः वासितं सुरभीकृतं। किं विशिष्टो घनः वांतवृष्टिः वांता
वृष्टिर्येन स वांतवृष्टिः कृततोयपरित्यागः ॥ वांतस्य च तिक्तकषायरसः उपमसस्यते ॥ किं विशिष्टं तोयं। जंबूकुंजप्रतिहतरयं। जंबूलताजाले स्ख
लिततोयवेगं। हे मेघ त्वां तवंतं अनिलो वायुः तुलयितुं कंपयितुं न शक्ष्यति न शक्नोति। किं भूतं त्वां अंतःसारं। अंतर्मध्ये सारं बलं यस्य स तं जा
तबलं संतं। विद्धितवदनादि सुहृदीनां रिक्तकोष्ठत्वेन निस्सारशरीरं मरुदस्तिरस्तवति। तदर्थांतरन्यासेन निरूपयति। हि स्फुटं निश्चितं रिक्तः शू
न्यवित्तवः सर्वोपि समस्तोपि लघुः नादरणीयो भवति। पूर्णता गौरवाय। पूर्णता गौरवाय गौरवार्थं सर्वं भवति ॥२०॥ मार्गोपदेशनार्थे

अन्योपितत्र
कमर: कर्दुर्व
कंपायत्ना
ति

मेघदूतटी०

माह॥ नीपं दृष्ट्वा हरितेत्यादि॥ हे घन सारंगास्त्वमरा: नीपदलगपस्त्वबान् सारं मधुरं गायंतीति सारंगा: भ्रमरा: ते तव मार्गं अधानं स्तव
यिष्यंति परस्परं कथयिष्यंति। किल अनेन पथा प्रस्थितो मेघ: परमस्मात्तिः मंदतागेपि नइष्ट: इति परस्परं कथयिष्यंति। किं कृत्वा नीपं कदं
बकुसुमं दृष्ट्वा अवलोक्य किंविशिष्टं नीपं केसरै: मकरंदाधारै: हरितकपिशं हरितं च तत्कपिशं च हरितकपिशं। नीलकपिशं। कर्म
धारय: समास: किंत्तते: केसरै: अर्द्धरूढै: अर्द्धसमुत्पन्नै: कंदलीं दर्शनप्रस्ताव प्रक्रमात् सारं सचरं गच्छंतीति सारंगा: हरिणा तव मार्गं पंथा
नं स्मूचयिष्यंति। किं कृत्वा वज्जन: चकार: क्रियासमुच्चयार्थ: अनुकच्छं कच्छं कच्छं अनुलक्षीकृत्य अनुकच्छं कंदली: कंदलश्रेणीरालो ×वनस्ति छिद्रे पात्र×५
क्य। कथंभूता कंदली। आविस्तृत प्रथम मुकुला। संजात नवीन कोरका: च पुन: दग्धारण्येषु: वीतगत्वात् घ्राणाप्तकरणात् सारं
सलिलं गच्छंतीति सारंगा करिण: ते तव मार्गं स्मूचयिष्यंति। किं कृत्वा उर्व्या: भुव: गंधं आघ्राय संघिवा। केषु दग्धारण्येषु। ग्रीष्मदा
वद्गुष्टकाननेषु॥ किंविशिष्टं गंधं अधिकसुरभिं। अतिशयसुगंधि। उर्व्या: पृथिव्या: गंध: स्वाभाविक एव जलकणासिक्ताया: पुन:
स्फुयात्स्तवतीति उक्तं। कचित्सूरय: इति कथयंति। कर्दमाकुलायां इला विलायां गजानां मदानक कष्ट: वरमानं कमण्वातयस्यागमे
यस्यास्ताते मदक कष्टं समुत्पद्यते। सद्यागमं कथं स्मूचयष्यति। अन्यगजा: निर्वारिता: उत सारंगा चपी द्रकाव मार्गं स्मूचयिष्यंति। किं
विशिष्टस्य ते जलवमुच: जललवान् जलकणान् मुंचतीति जललवमुक् तस्य जललवमुच: तोयजलवर्षिण: ते तु जलकणाकांक्षि
ण: अतस्ते मार्गं स्मूचयिष्यंति॥२१॥ अंभोबिंदुग्रहणरसादि॥ हे मेघ सिद्धा: देवविशेषा: प्रियसहचरी संभ्रमालिंगितानि मानयिष्यं
ति अनुसविष्यंति। अन्यमनस्कानां सिद्धानां वदीयो र्जित गर्जितमाकर्ण्य संजातसंभ्रमाणां वच्छ्रेतबनितानां चाटुशतदुर्लभान्यपि
स्वयंकंठग्रहाश्लेषसुत्तगानि गाढोपगूढानि अकस्मादयत्नसाध्यानि तविष्यंतीति तिसाव: किंदा वास्तनित समये गर्जितकाले त्वां स्तवंतं
मामाद्य धाप्या: किंत्तानि प्रियसहचरी संभ्रमलिंगितानि। सो कंगनिउ कंगसहितानि। सिद्धा: किं कुर्वंत: बलाका: बिसकंटिका
अरिगणानया अस्यां पंक्तौ स्थितं सबेतोगणाने वर्षरिसंख्याया निर्देशंत: अंगुल्यग्रेण दर्शयंत: किंलतां बलाका: श्रेणीभूता: अथ

सिद्धा

णयः श्रेणीयोत्तवंति श्रेणीलताः पुनः के सिद्धाः किं कुर्वंतः चातकान् सारंगान् वीक्षमाणाः अवलोकयंतः किंभूतान् चातकान् अंभोबिंदुग्र
हणरसतत्परान् अंभसां बिंदवः अंभोबिंदवस्तेषां ग्रहणं तत्र रसतत्परा येषां ते तथा तान् ॥ रम्या चोद्दसरामणीयक विलोकनेन कालविलंबं निषेधय
न्नाह ॥ उत्तररूपामीत्यादि ॥ हे सखे हे मित्र तत्वकालक्षेपं कालविलंबं उत्तररूपामि उत्साल्पेन उद्यामि ते किं कर्तुं मित्रः द्रुतमपि शीघ्रमपि मत्
प्रियाद्यमितः प्रतिद्रुतो प्रियासंगं तु मित्रः मम प्रियं मत्प्रियं तद्वाधं प्रयोजनं यत्र गमनं तत्तमहितं तद्रुतः असमत्प्रियसंदेशकथनार्थं वा ॥ कःकाल
क्षेपं तत्र विपत्तिपर्वते पर्वते ॥ तत्र तत्र ति ॥ किं विशिष्टे तत्र ति ॥ ककुभ सुरत्नो ॥ अर्जुनहृद्रुमसुगंधे किं विशिष्टस्त्वं ॥ शुक्लापांगैः मयूरैः कथमपि केन
प्रकारेण गच्छन्नपि गतः सनतासु ... आनः किंभूतैः शुक्लापांगैः सजलनयनैः चिरकालसुहृद्दर्शनेन बाष्पवारिपूरितनेत्रैः किं च वाकेकाः वाणी स्वा
गता सती ॥ अस्वागता स्वागता कुर्वाणस्वागती कृता केकां तं प्रति स्फुटदतिनवककुभ सुमसुरभिलरनिबद्धवसतेस्सादरोद्गीरिततारमयूररवाया
कर्षनमुदितचेतसः तव कियतारपि कालककालविलंब सत्ताम् स एव रत्तिसाचः तवान्वेगं गंतुंगमनाय आशुसाधुप्रयतस्व ॥ व्यवसायं कुर्यात्तिा ॥ २
२ पांडुच्छायोपवनेत्यादि ॥ हे जलद दशार्णाः देशाः हंसा मराला कतिपयदिनस्थायिसंपत्स्यते संत विस्पं ति ॥ कतिपयदिना निति पंतास्वं वशीला
हंसामरालायेषु तोयाद्यंतो ॥ रघ्वस्तनीरंध्रजलधरस्वरारावोरिणीतिः अतिलोकलन्पाविलय ... वनत्र दृसाव स्थानं पुत्पतो किंभूताद्दशा
र्णाः परिणतिफलश्यामजंबूवनांताः पक्वफलैः श्यामा कालका तत्य जंबूवनानां अंताः पर्यंताः येषु ते ॥ कसति त्वयि सवति समासन्ने सति
नः किंभूता दशार्णाः आकुलग्रामचैत्याः आकुला विसंखलाग्रामाणां चैत्या इद्धपादपा येषु ते ॥ पुनः कथंभूता दशार्णाः केतकैः के
तकीपुष्पैः पांडुच्छायोपवनवृतयः पांडुच्छाया अवदात कांतयः उपवनानां उद्यानानां वृतयः कंटकिवीरुद्रावृतयो येषु ते ॥ किंभूतैः के
तकैः स्फुविलित्रैः स्फुविलसमुद्भिन्नैः पुनः किंभूतैः केतकैः गृहबलिभुजांवटकानां नीडारंभैः आलयोपक्रमैः ॥ रघतेषां दिक्षु प्रथितेत्यादि ॥
हे मेघ तेषां दशार्णानां राजधानीं रूपनिवासनगरीं दिक्षु आशासु प्रथितः साधुं गत्वा समासाद्य अविकलं संपूर्णं फलं अतिशयं कामकथ्यम् कामितावस्य
लब्धा प्राप्स्यसे ॥ किं विशिष्टां राजधानीं प्रथितविदिशालक्षणां ॥ प्रथितं विख्यातं विदिशेति लक्षणं नामयस्याः सा प्रथितविदिशालक्षणा तां तथोक्तां ॥
हे मेघ वेत्रवत्याः नद्याः पयोजलं यस्मात्कारणात् पास्यसि ॥ किं विशिष्टं पयः स्वादु स्वादिष्टं ॥ पुनः कथंभूतं चलोर्मि चंचलवीचि ॥ पुनः कथंभूतं प

... अलंकारः ... भार्गुनदासेनोल्लास

४ यद्वाय ... इ ... नाय ... विदिशा ... अलंकार ... दन्नास ... शिखनेनालाप ... रत्य ... नाद ...

×अत्रोपमालंकारः॥ विलासवासोचितकहर्षिके तत्र विश्रामोद्देन नारिदसा लक्ष्मीति दर्शि
याह×३

यः तीरोपांतस्तनितसुभगं नीरोपांते तटनिकटप्रदेशे प्रसादत्याम्नि तं धनितं तेभिन सुस्तगंसुंदरंयतपयः तलतनपयः किमिव सत्रूतंगंसन्न
विलासंमुखमिव। आस्यमिव। त्वंसंयुक्तं मुखमिव। यतः अन्योपियः कश्चित्कामुकोगाउं धानं गच्छति सोपिमाणितन्कूरं जितसुंदरंयचासवतिएवं
वेत्रवत्याः वेत्रलताहतीहारवंद्धेणारक्षितायानायिकायाः स्वाउमधुरंमुखपीवाकामितायाः फलंलसंते॥२५ नीचैराख्यमित्यादि॥ हे मेघ नीचैर
ख्यं नीचैरिति ख्यासंज्ञायस्यासौ तं गिरिं शैलं अधिवसेः अध्यासयः। कस्मै तस्मि त्वद्धोमार्गे विश्रामहेतोः मार्गखेदापनयनाय। उत्स्य
तेकदंबैः नीपपादपैः रुवावसं पर्कात्सवत संगमात्पुलकितमिव। जातरोमांचमिव। सुहृदालिंगनन प्रणयिन पुलककं
लिकाकलितवपुषः संपद्यंते। किंविशिष्टैः कदंबैः प्रौढपुष्पैः विकसितकुसुमैः यः गिरिः नागराणां नागरिकलोकानां च
उराणांवायौवनानितारुण्यानि शिलावेश्मभिः उपलगृहैर्दीर्रीतिः रुवाप्रथयति। प्रकाशयति। किंतानि यौवनानि। उद्दामा
नि उदाराणि। किंविशिष्टैः शिलावेश्मभिः पण्यस्त्रीरतिपरिमलोद्गारिभिः पण्यस्त्रीणां पण्यांगनानां रतिसुरतकेलिषु
यः परिमलतद्वसुरूपलिप्तचंदनादिविमर्दनामोदस्तंउद्गिरंतीति उद्वमंतीति एवंशीलानि तैः एवंभूतैः॥२६ विश्रांतः इत्यादि॥ हे मेघ वि
श्रांतः सन्॥ कामलालत्तानुविहं अध्वानमुपदेष्टुं आह॥ हे मेघः त्वं विश्रांतः सन् कृताध्वखेदापनोदः सन् वनद्युगनदीयायाः तं किं कुर्वन् उद्या
नानां आरामाणां यूथिकाजालकानि मल्लिकासमूहानि सिंचन् उद्गिरन्। कैः नवजलकणैः प्रथमजलकणाविंदुभिः किंविशिष्टं पुष्पकला
वीमुखानां पुष्पाणि लुनातीति पुष्पलाविन्यस्तेषांकर्मणि छायादानात्आतपवृत्तिरक्षणात्। रूणपरिचितः रूणेतस्मिन् समये रूपाणां वा
परिचितः प्रणयीतवन्। किंरूतानां पुष्पलावीमुखानां। कांतकपोलतलानां। म्लानश्रवणेंदीवराणां। कयागंडस्वेदापनयनरुजा। पुष्पाव
चयप्रयासजनितकपोलश्रमजलप्रोक्षनपदयातथाकर्णोत्सवचलस्त्रोवनानां वलरुवाम्लानिनानीतानि अथः रूतानिकर्षापिला
निप्रतीयंते॥२७ वक्रः पंथेत्यादि॥ हे मेघ सवतस्त्व यद्यपि उत्तराशांउदीचीदिशंप्रस्थितस्यगच्छतः वक्रः कुटिलः पंथा मार्गः
स्यात्। तथापि एवं सत्यपि उज्जयिन्याः अवंत्याः सौधोत्संगप्रणयविमुखोमास्मभूः॥ सौधानां सुधाधवलितप्रासादानां उत्संगेक्रोडे तस्य
प्रणयेन स्नेहेन परिचयस्तस्मात्। विमुखोमाभूः। तत्रतस्यां नगर्यां विद्युद्दिवैतपौरांगनानां नगरनारीणांलोचनैर्नेत्रैः न रमसि न क्रीडसि

×अत्रानुमानालंकारः×२

×अत्रोल्लेखालंकारः×२

उत्ता निरूपनज उत्कर्णिकासि काणि स्फुटंति

६

तदा अस्मिच्चंवं क्ति:कथंभूतैर्लीचनै:लोलापांगै:वटुलश्रांतै:पुनःकथंभूतैर्लोचनैः विद्युद्दामस्फुरितचकितैः विद्युद्दाम्नेनस्फुरि
तेनचकिता निरस्तानितैःतथाभूतैः शफाकलायस्त्वित्रिपुराणाख्यषितत्रस्तैः।२५। वीचिक्षोभेत्यादि।।मार्गेप्रदेशद्वारेणपाथोदस्वनिस्ता
वेन अभिधीयमाननदी।हृदयविरहवस्तकथनेनतन्नाधतांस्निरूपयत्राह।।दमेघंनिर्विंध्यायाःनिर्विंध्यातिधानायाःनद्याःपवि
मार्पेस्त्वप्रवलतां।किंस्वारसाभ्यंतरंअंसोगलैसंनिपत्यच विरूप।निर्विंध्यायाःकिंकुर्वत्या।स्खलितसुभगयथास्यादेवंस्खलितेनअ
लादिप्रतिवंधेनसुभगंसुंदरंकामिन्यास्वकमनीयकामुकविलोकनानुगमनविलासालयंसवतियथातथासंसर्वंता:दर्शयंतासा:पुनःकिं
विशिष्टायाःनिर्विंध्यायाःवीचिक्षोभस्तनितविहगश्रेणिकांचीगुणायाःवीचिक्षोभेन कल्लोलचलनेनस्तनितविहगश्रेणिर्यासि
तत्राकुलपंक्तिःसैवकांचीगुणोमेखलादामयस्याःसातथोक्ता।।श्रीपदेपक्षिश्रेणिवलयउपमानेनविग्रहः पुनःकथंभूतायाःदर्शितावर्ते
नाभेःदर्शितःप्रकाशितःआवर्तो अंतसंस्तम सएवनाभिर्ययासातस्याःतथाभूतायाःदिस्फुटंनिश्चितंस्त्रीणांयोषितांप्रियेषुवल्ल
तेषुविभ्रमोविलासःआद्यंप्रथमंप्रणयवचनंप्रीतिसंतोषणंभवति।।२६। वेणीभूतेत्यादि।।दसुभगसिंधुर्नामनदीयेनविधिना
येनप्रकारेणकार्श्यंकृशिमानंप्रजातांपरिक्रतिपरिहरति।सविधिर्मोपरःत्वयास्त्वस्तावउपपाद्यउत्पादनीयः।सिंधुर्नदीकिंकुर्वंतीतेतवसौभाग्यं
सुभगत्वंनिजविरहावस्थयावियोगदशयाप्रकटयंतीव्यंजयंती।।किंविशिष्टस्यते।तांनिर्विंध्यांनाम नदीं अतीतस्यअतिक्रांतस्य।किंविशिष्टा
सिंधुःवेणीभूतप्रतनुसलिलावेणिदंडीभूतस्वल्पजला।पुनःकथंभूताःसिंधुःपांडुछाया।धवलकांतिः।कैः जीर्णपत्रैःशुष्कपत्रैःकथंभू
तैःशुष्कपत्रैःतटरूढतरुभ्रंशिभिःकूलजातवृक्षेःसंपतितैः।।२७।प्राप्यावंतीनुदयनेत्यादि।।दमेघपूर्वोद्दिष्टांप्रथमंगदितांविशालांउज्ज
यनीपुरींनगरीअनुसरगच्छ।किंविशिष्टां विशालां।श्री विशालां।श्रियालक्ष्म्याविशालाश्रीविशालातांतथाभूतांविशालेत्येवंनाम।।य
द्वाविशिष्टाःप्राकारास्तवनविशेषावायस्याःसातांतथाभूतांविशालां।किंकृत्वा।अवंतीन्मालवाभिधानजनपदानप्राप्य आसा
द्य।किंविशिष्टानअवंतीन्।उदयनकथाकोविदग्रामवृद्धान्।उदयनस्यवत्सराजस्यकथावार्तांतत्रकोविदाःपंडिताःग्रामाणांवृद्धाःप्रव

मेघदूतटी०

यस्तेष्वेव तेतान्। कस्मिन्सति। सुचरितफले श्रेयःकर्मणः फले स्वर्गोपभोगलक्षणे। स्वल्पीभूते उपभोगान्। अपचितपरिमाणे सति॥
उच्चैर्दत्तैदिवः स्वर्गस्य एकं अद्वितीयं खंडं अंशं दत्तमिव। इवात्रानीतमिव। कांतिमत श्रीमत। कैः आत्मैः सुकृतैः। किंभूतैः सुकृ
तैः शेषैः अवशिष्टैः केषां गां भुवं स्वर्गिणां देवानां गतानां भाग्यानां॥ ३२ दीर्घीकुर्वन्नित्यादि। हे मेघ यत्र पुर्यां सिप्रावातः सिप्रान
दीपवनः स्त्रीणां नारीणां सुरतिग्लानिं संभोगश्रांतिं हरति। स्फुटयति। किंभूतः सिप्रावातः अंगानुकूलः स्पर्शसुखदः किं लक्ष
विस्त्रिविध त्रिविधो वर्ण्यते। सीतो मंदः सुरभिश्च। सुखस्पर्श गुणेन मधदः कथितः सुरतक्रमहर गुणेन शीतत्वं प्रकाशितं। पुन
किंभूतो वायुः स्फुटितकमलामोदमैत्रीकषायः स्फुटितानि विकसितानि कमलानि कोकनदानि तेषामामोदः परिमलः तस्यामै
त्री संपर्कः तया कषायः वासितः सुगंधिः अनेन सुरभित्वं प्रोक्तं। सिप्रावातक इव। प्रियतम इव दयित इव। यथा दयितः स्पर्शसु
खदो भवति। किं विशिष्टो प्रियतमः प्रार्थनाचाटुकारः सुरतयाञ्चार्थे चाटूनि करोति। तिथा प्रार्थनाचाटुकारः सिप्रावातः किं कुर्व
न्। प्रत्यूषेषु प्रातःसंध्यासु सारसानां पक्षिणां कूजितं विरुतं पटु स्पष्टं मदकलं मदेन मनोज्ञं दीर्घीकुर्वन् प्रसारयन्। प्रियत
मेन साम्यं॥ ३३ हारांस्तारानित्यादि। हे मेघ सलिलनिधयः समुद्रास्तोयमात्रावशेषाः सलिलमात्रमेव अवशेषं येषु ते तथा
विधाः संलक्ष्यंते ज्ञायंते। किं कृत्वा। यस्यां नगर्यां विपणिरचितान् पण्यवीथीस्थापितान् दृष्ट्वा अवलोक्य। विशेषणद्वारेणाह। किं
भूतान् विपणिरचितान्। हारान् हारमुक्तान्। किंभूतान् हारान् तारान् निर्मलान्। पुनः किंभूतान् स्थारलगुलिकान्। स्थूल
मुक्ताफलान्। पुनः किंभूतान् कोटिशः अनेकशः शंखशुक्तीः शंखाश्च शुक्तीश्च शंखशुक्तीः। पुनः किंभूतान् शष्पश्यामान्
वर्त्तितृणवत् हरितवर्णान्। पुनः किंभूतान् मरकतमणीन्। गारुडमरकतरत्नविशेषान् (की)दृशान् मणीन् उन्मयूख
प्ररोहान्। उद्भूतकांतिपल्लवान्। अतो हेतोस्तोयमात्रावशेषाः सलिलनिधयो ज्ञायंते॥ ३३ प्रद्योतस्येत्यादि। हे मेघ यत्र
स्यां नगर्यां अभिज्ञो विदग्धो उदयनोलोकः आगतान् परदेशादागतान् बंधून् स्वजनान् इति अनेन प्रकारेण रमयति विनोदयति

हे मेघ अत्र अवरिवसराजः उदयनः प्रद्योतस्य चंडप्रद्योतनाम्नो राज्ञः प्रियदुहितरं प्रियां वासवदत्तां
उरूहे ततवान्। अत्रैव तस्यैव राज्ञः प्रद्योतस्य नरपस्य तः हे मंसोवर्ण तालद्रुमवनं अभूत् व्यचव। अत्र स्थाने अनलगिरिद्विपः स्तंभं उ
त्पाट्य उन्मूल्य दर्पात् किल इति सत्य उद्भ्रांतः मदविकलो बभ्राम। इथ ज्ञाला कीलैरित्यादि। हे मेघ अस्याः नगर्याः हर्म्येषु प्रदेशेषु
दं श्रमनीत्वा अतिवाह्य ब्रज। किंविशिष्टेषु हर्म्येषु। कुसुमसुरभिषु पुष्पैः सुगंधिषु। किंविशिष्टः त्वं अवरिक्तांतरात्मा। अध्वनामार्गगमनेन
खिन्नः श्रांतो अंतरात्मा मनो यस्य स तादृक्। पुनः किंविशिष्टेषु हर्म्येषु। ललितवनितापादरंगेषु किं तेषु। ललितवनितानां नारीणां पादरागः च
रणालक्तकस्तेन अंकितेषु चिह्नितेषु। किंविशिष्टः त्वं केशसंस्कारधूमैः केशानां परिरंजनमर्दनानां संस्कारः उपस्कारः तदर्थं धूपधूमास्तैः दत्तमा
नरूपस्य धूमः धूमैरित्यर्थः। उपचितवपुः पीवरशरीरः किं तैः ते केशसंस्कारधूमैः जालोद्गीर्णैः मातायनद्वारोद्वातैः उद्गीर्णैः पुनः किंविशिष्ट
त्वं बंधुप्रीत्या सुहृत्वा स्नेहेन भवनशिखिदत्तनृत्योपहारः मंदिरमयूरैः दत्तनृत्योपहारः दत्तो वितीर्णः नृत्यं ताण्डवं तदेव उपहारः सपर्या यस्मै स तादृक्। त्वं अव
लोकय प्रमुदिताः नर्तितमयूराः इत्यर्थः। तदनु कं वेलावधिं ध्यानधं पुण्यं धूमरस्य हरस्य पुण्यं पवित्रं सम गच्छ यायाः गत्वा। किं कृतस्य चंडीश्वरस्य त्रिभु
वनगुरोः त्रिलोकस्य शंकितस्य। किंविशिष्टः त्वं। प्रथमे सादरं सबहुमानं सभय यत्नं यथा स्यात् एवं तथा वीक्ष्यमाणः अवलोक्यमानः। किंविशि
ष्टः त्वं तर्तुः स्वामिनः कंठच्छविरिति नीलगलउल्लस्यकांतिरिति। किंविशिष्टं धाम महाकालमरुत्। शिवा दत्तैः धूतोद्यानं कंपितोपवनं किंविशिष्टैर्मरुद्भिः कुव
लयरजोगंधिभिः कुवलयानां उत्पलानां रजसां मकरंदरेणूनां गंधः आमोदो विद्यते येषां ते रतेः तथा तैः अनेन गुणेन सुरतिबंधशति
पादिता उनः किंतु तैः वतिः तोयक्रीडानिरतयुवतिस्नानतिक्तैः तोयक्रीडा जलकेलिस्तत्र निरता आसक्ता युवतयः पौरवनितास्तासां
कुंकुमादिलिप्तदेहानां स्नानं मज्जनं तेन तिक्तैः सिक्तैः सुरभितैः आमोदितैः। कस्याः गंधवत्या नद्याः। अद्यप्रभृति स्नेह जलधरेत्यादि। हे जल
धर हे मेघ त्वया अपन्यस्मिन् अपरस्मिन् अपि महाकालं देवविशेषं आसाद्य प्राप्य काले प्रस्तावे स्थातव्यं रक्षणीयं यावत्तावत् आनयेन
यनविषयं अस्तिलोचनपथे यावत् भानुः सवितावर्तते अनस्तमितः स्यात् इति किं कर्त्तव्यं संध्याबलिपटहतां संध्यादिनांतेषु धौतलहरः।

॥ कथं सादरं सादरं च कारण माद ४

अत्ररूपकालंकारः ४३

ल्लालिश्रः तासु वलयः प्रकोष्ठद्वारः तत्र पदं दत्तां कुर्वंश्च । आनकतां कुर्वन् । कस्य स्खलिनः हस्तस्य । किंभूतां संध्याबलिपटहतां श्लाघ
नीयां असमनीयां आमंद्राणां । अतिगंभीराणां हे मेघ गर्जितानां गर्जीरणां । अविकलं संपूर्णं फलं अयाः रूपं लप्स्यसे प्राप्स्य
सि ॥ ३५ ॥ पादन्यासे त्यादि ॥ हे मेघ तत्र महाकाले वेश्याः देववारवनिताः त्वयि सति विषये कटाक्षान् नेत्रान् आमोक्ष्यंते प्रक्षेप्स्य
ते । किं विशिष्टान् कटाक्षान् । मधुकरश्रेणिदीर्घान् । मधुपपंक्तिवत् आयतान् दीर्घान् । किंरूपा वेश्याः । वर्षाग्रबिंदून् त्वत्तः प्रथमपतित
करेणान् प्राप्य लब्ध्वा । किं विशिष्टान् वर्षाग्रबिंदून् । नखपदसुखान् । नखानां कररुहाणां पदानि क्षतानि तेषु सुखदे उवाव
सुखदातॄन् नखपदसुखान् । किं विशिष्टा वेश्याः । चामरैः बालव्यजनैः क्लांतहस्ताः करतलश्रांता । पुनः किंभूता वेश्याः । पाद
न्यासक्वणितरशना । पादन्यासेन चरणक्षेपणेन क्वणिता रसिता रशना मेखला यासां ताः । किं विशिष्टैः चामरैः लीलावधूतैः दोल
दोलितैः पुनः किंभूतैः चामरैः रत्नच्छायाखचितवलिभिः रत्नानां मणीनां छाया कांतयः ताभिः खचिता संबद्धा वलयस्तद्दंडमं
डलीकृतपर्वरविच्छिन्नयोयोषां तैः ते । अथवा खचिता करितावलयस्त्वासां तासामेव चामरग्राहिणीनां उदाराः वलयस्तैस्तथोक्ते
तैः ॥ ३६ ॥ पश्चादुच्चैरित्यादि ॥ हे मेघ पश्चात् गमनानंतरं पशुपतेः हरस्य आर्द्रनागाजिनेच्छां कीलाल किं त्वं रित्वमेकं हरन् त्वां रंज
नाच्चोपक्रमे दरकरयी । किं विशिष्टः त्वं सांध्यं तेजः संध्यासु त्वं सांध्यं प्रकाशं दधानः धारयन् । किंरूपं तेजः नवमंडलेन तिर्यग्भुजागेन
आलीनः संश्लिष्टः किं विशिष्टं तेजः प्रतिनवजपापुष्परक्तं । प्रतिनवो छिन्न जपाकुसुमासरक्तं । पुनः किं विशिष्टं तेजः शांतोद्वेग
स्तिमितनयनं शांतः अगतः उद्वेगः भयं सा पार्वत्या तेन स्तिमितेन निश्चलेन नयनेन विलोकने यत्र तत्त्वसि
नरूपं विधं । अथवा । वीतस्त्याकारकरः शिवदर्शनादुद्वेगः प्रद्वेषः प्रशांते तेन स्तिमितो निष्कंपः स्तिमितो अतिनिष्कंपः प्रति
भुकाराग्रेवेनि यथा स्यात् । पुनः उच्चैः अत्यर्थं भुजतरुवनं बाहुदंडखंडमंडलं । किं विशिष्टः त्वं भवान्याः गौर्याः दृष्टभक्ति
अवलोकितवती ॥ ३७ ॥ गच्छंतीनामित्यादि ॥ प्रकारप्रकारकवैनश्री साद्यत्राद्धा ॥ हे मेघ तत्र तस्मिन् स्थाने योषितां अति

अत्रोपमालंकारः ४०

सारिकाणां त्वं तु वृंदावदीद र्शयद्रकास्य । यो ऽपि तां किं कर्हनीनोरम्सलतमम्ब्रियस्ह्रंगह्रे । नयोलानां । बक सचिनकं राज्ञोतमोरिः
अंधकारे नरपति पथेराजमार्गे रुद्धास्ते लोके सति । अवष्टब्ध अकारोसति । किंविशिष्टे स्तनोति शद वित्तेद्धे शदी विद्या कयातु वंदरी
यासोवामिन्या । विद्युता रुचा । किंविशिष्टया सौदामिन्या । कनकनिकषस्निग्धयाद्दमकषवल रूपरूपा । हे मेघ त्वं तेयोमस्तनितमुखर
रः मा स्म भूः मा भूयाः उत्सर्गाणां नंतर स्तनितन गर्जितेन मुखरो वाचाल श्च तथा परुष ध्वनिमा भूयाः । यतस्ताः स्त्रियः विक्लवाः स्वतः दैन्यभीर
वः ॥४०॥ तां कस्यां विद्युद्वनेतादि । हे मेघ त्वं तस्यां अवशिष्टमार्गे पुनरपि वाह्येतस्मापयेत । किं कृत्वा स्वर्यनानो दृष्टे चक्षुः गो
चर वारणीतां द्रष्टवाँ कांक स्यां विद्युद्वनवल तो अन्य तस्यां नवनानां वेश्मनि वलभिउपरितनस्थमि तस्यां सन्निप्तिमा यामां नीत्वा । अति
क्रम्य । किंवत्तया भुवनवलतो । घुस पारापतायां । अजागरूक कलरवा यातेद्धितस्याः पारापत पत्रिणः कामिनां कंव कूजने
न आगरूका तवंति । किंविशिष्टः चलित्र विद्युत्स्कलत्रः स्विन्न श्रांत विद्युद्देवकलत्रं यस्य सतथा स्ततः कस्मात चिर विलसनात्
वक्रकाल घनक्रीडनात् । असुपेताधें मत्या । असुपेतस्मं । कृतं प्रयोजन स्वकरणीय ये तेतथा विधः । सुहृदां मित्राणां खलु नि
श्चयेन मंदायंते अलसा न तवंति ॥ अस्त भिन्नकालतादि ॥ अतो प्रस्थ निःदीरांगनासंगमेन कामनसा फलत्वनिरूपयन्नाह । हे मेघ
अत अमाद्धेतो आस्त्रमी घ्नतानो श्रीमर्य स्य वर्लभ मार्गेलत परिवृत्त । तस्मिन् काले इतात समयधं डितास्यो षितां स्त्रीणां नयनसलिलं लो
चनांतः जलायिन्निदर्शयिते शांतिं उपसमं नेयं नेतव्यं ॥ निद्राकषायकुंडली कलता अनेत्रो नारी न रवडणाविशोषित विचित्रांगः यस्याकृतो
पि गद्गद्मेति पुनः प्रस्तातो सा खंडिते ति कथिता कविति पुराणे ॥१॥ यतः सोपि तानु नलिन्याः पद्मिन्याः कमलवदनात् कमलामव वदनं तस्मा
त् सालेयास्तंत्र व स्याय जलं दवे प्रत्यागत प्रत्यावृत्तः । अपितवत्निकर रुधिर स्मिरोधिके अनल्पास्यस्य अनल्पाभ्यसुरात्र स्त्वस्य यात्रि ह्रद्दमा
यस्य सतथा स्ततः स्मातायः कोपि प्रियां प्रति प्रियाकरणाय प्रस्तारितं तरुणाद्धि तत्र तन्निस्त्वेडसो पिरोधः पदं करोति । किंपुनः सूर्यस्य नति
धा सती ति त्वया व्यक्ता आसावान निशो निशां कयाप्रत्यागमनमकुर्वन्ना अनल्पास्यस्य सार्वाधरां गंसी राया पद्म सीतादि ॥ हे मेघ

अत्रावित्रस्ये
के ५ पर्यो संकर
अद्गुणकायस्य
नोगपर्या दस
नवसंपदद्रौ
पैत्रादर ४॥

मेघदूतटी

ते तव छायात्मा प्रविशति बिंबस्वरूपमपि प्रवेशं अंतरवस्थानं लप्स्यते प्राप्स्यति। कः गंभीरायाः गंभीरा इति विख्यातायाः सरितो नद्याः पयसि जले उज्ज्वले अतिस्वच्छे निर्मले चेतसीव मनसीव। किं विशिष्टः त्वं प्रकृतिसुभगः स्वभावसुंदरः तस्मात्कारणात् अस्या नद्या नायिकायाः चटुल शफरोद्वर्त्तनप्रेक्षितानि चंचलमत्स्योद्वर्तनावलोकनानि मोघीकर्त्तुं विफलानि विधातुं धैर्यात् तथा रवल हठेन नायकवत् गुणान् न अर्हसि न योग्यो भवसि। किं विशिष्टानि प्रेक्षितानि कुमुदविशदानि कुमुदवत् विशदानि निर्मलानि कुमुदविशदानि श्वेतावदातानि। अंगनानां प्रणयिषु प्रेमानुबंधः तत्संयोगादेव सफलतामनुभवति सर्वमपि प्रख्यापयन् एतस्याः प्रीतितरलविलोकितानि संगमनं विधाय सफलय। एनां परिहृत्य मागाः॥४४॥ तस्याः किं वा सारि। हे सखे मित्र तेन तव पश्चादागमनं कथमपि महता कष्टेन संपत्स्यति। किं कृत्वा तस्याः गंभीरायाः नद्याः सलिलवसनं सलिलं जलमेव वसनं वासः हृत्वा। अपहृत्य। किं कृतं तया प्रवानीरशाखाः प्राप्तलंबवानीरस्य वेतसस्य शाखा हस्तास्तायेनेति वक्रोक्तिः पुनः किं विशिष्टं सलिलवसनं नीलं नीलवर्णं पुनः किं विशिष्टं सलिलवसनं मुक्तरोधोनितंबं मुक्तस्त्यक्तो रोधः तीरमेव नितंबो येन तत्तथाविधं पुनः किं विशिष्टं वा सलिलवसनं उत्प्रेक्षते करधृतमिव हस्तावष्टब्धमिव कामिनः परिधानमपहरतः पुरंध्रा पाणिना धृतमादि। किं विशिष्टस्य ते लंबमानस्य अंतोन्नरमेघावृतेन तत्र सक्तस्य। किं विशिष्टः ज्ञातास्वादः अनुभूतरसः अथवा पुलिनं जघनं पुलिनमेव जघनं यस्याः सा तां तथाविधां विदांतु त्वत्कं कः पुरुषः प्रभुः समर्थः अपितु न कोपि परिहर्त्तुं पुलिनमिव जघनं यस्याः सा साप्युज्जघना तां तथाविधां नायिकां त्यक्तुं कः समर्थः अपि तु न कोपि॥४५॥ निष्पंदोच्छ्वसितेत्यादि॥ हे मेघ ततस्तव पश्चात् वनं नीचैः शनैः शनैः वास्यति संचरिष्यति। किं कर्तुमिव तेन तव देवगिरिं देवनाम्नः पर्वतस्याभिरितः सदैव सर्वो गिरिः स्तनयादिदेवगिरिं उपजिगमिषोः उपगंतुमिच्छोः। किं विशिष्टो वायुः शीतः शिशिरस्पर्शः श्रोतारं ध्वनितमुत्सर्गं करिकरविवरधारिणं ध्वनितं तस्य ध्वनितं तेन सुसंगं सुंदरं यस्मात् स्वंत वादं नितिः स्वरविदारिनिः गिरिवरकरिणिः पीयमानः आस्वाद्यमानः पुनः किं विशिष्टो वायुः निष्पंदोच्छ्वसितवसुधागंधसंपर्करम्यः तव निष्पंदस्तोयकणप्रवणं

तेनोल्लसिता विकसिता वसुंधरा तस्याः गंधः संपर्कः परिमलः परिचयः तेन रम्यो मनोज्ञः वायुः किंलक्षणः काननोडुंबराणां अरण्यउदुंबरवृक्षफलानां
परिणामयिता पाचयिता नयामयिता ॥ अथ तत्र स्कंदमित्यादि ॥ हे मेघ त्वं तत्र तस्मिन् देवगिरौ स्कंदं कुमारं स्नपयतात् स्नपनं कारयतु । किंविशिष्टं
स्पुरवां नियतवसतिं निश्चितवासं । पुष्पासारैः कुसुमवर्षैः पुष्पमेघीकृतात्मा । कामरूपत्वात् मेघवत् पुष्पमेघीकृत आत्मा स्वरूपं येन स पुष्पमेघी
कृतात्मा । अनेन पुष्पाणां पवित्रता प्रोक्ता ॥ किंविशिष्टैः पुष्पासारैः व्योमगंगाजलार्द्रैः आकाशगंगायाः जलक्लिन्नैः कस्मात् उपास्यत इति तन्मदालंबनं निरू
पयति । हि स्फुटं निश्चितं तत् तेजः रविवीर्येण वज्रशिस्ता न्यस्तं छेकलालंकारेण रक्षानादेसोपकृतानां वासवीनां ऐंद्रीणां चमूनां सेनानां वासवी
नां भिसणां ... प्राप्नोति । तत् स्वात्सवा देवनासत्र अस्मिन् त्वं अगरूणाय कृतवत् मुखे हुतवहवदने संभृतं अत्यन्तं । किंविशिष्टं तेज अत्या
दित्यं आदित्यमतिक्रांतं अत्यादित्यं ॥ अदृश्याति लेखत्यादि ॥ पाथोदं अडितता प्रसादलक्षसंस्तावयन्त्योः मा दयन्वादः ॥ हे मेघ पश्चात् अनंतरं त्वं दरी गां मयू
रं नर्तयेथाः नृत्यं कारयेः ॥ कैः गर्जितैः प्रतिशब्दातगर्जितैः गरिष्ठैः किंविशिष्टैः गर्जितैः अद्रिग्रहणगुरुभिः गिरिकंदरायद्गणनगरिष्ठैः किंविशिष्टं
मयूरं पावकेः अग्निजन्मनः धौतापांगं शालितनेत्रांतं हरशशिरुचा हरस्य महेश्वरस्य शशी चूडामणिः तस्य रुचा चंद्रिकया । अनेन नत्रस्य सुदय
दन्तेन सदा ईश्वरस्य संनिपतत्वं प्रतिपादनं तेन नेत्रे । यथा यस्य केकिनः बर्हं पिच्छं भवानी पार्वती कर्णे अवतंसं करोति धारयति कर्या वत्र प्रीत्या पुत्रस्ने
हेन । किंविशिष्टं बर्हं कुवलयदलप्रापि कुवलयदलं उत्पलपत्रं संततं प्राप्नोति एवं शीलं कुवलयदलानुकारि । पुनः किंविशिष्टं बर्हं गलितं सु
तज्योतिर्लेखावलयि । तेजोराजिमंडलकवलयितं ॥ अथाराध्यैनमित्यादि ॥ अयो विशेषाधिगमकथनेन वियवद्योतनं मोदयन्वादः ॥ हे मेघ रंति
देवस्य राज्ञः मानयिष्यन् सत्करिष्यन् कीर्तिरिवः परिणतां तु विश्राता ... स्वर्गारूपेण रूपेणा लंबेया । प्रतीदेषा अन्यरूपपरित्यागेन रू
पांतरमापन्ना मेदिन्यां प्रवहंतीं रंतिदेवनराज्ञा यज्ञेषु सुरभयः मावः किलालब्धा ... तस्मात् निःस्यंदो परया वर्मन्वती सरिद्दियाय । कथं
तां स्रुरसितनयालंबनात् तासांसुरसितनयानाम् ... ता मालवः कंठशुभं त्वं दृष्टिपादः तस्मात् तं उद्यातां तव स्पर्शं किं ... सिद्धद्वंद्वैः देवद्यतीति
वीणिनि वीणायुक्तैः स्वक्रमार्गे कस्मात् जललवपानभयात् ... ता वीणावंतः ... वीणापाणिनिः य

[illegible]

मेघदूतटी

तस्तोयकणाहतंत्रीकरणाति इमेमघएवंप्रथमकथितं आखण्डलवंशीगातीरत्नछायाव्यतिकराइवमेतंनवंउत्तरत्रंआराधनपद्भपास्य। किंविशिष्टः अंउ
लङ्घिताध्वा। किंविदतिक्रांतवर्त्मा॥ धन्वन्त्रयादावमित्यादि॥ जलधरंअनिलवल्लमिल्लपासंतावनयाअनिलुवन्नाद॥ मेघमेघगगनगतंखे
चरांतस्याः चर्मन्वताः सिंधोः सरितः पृथुमपिविस्तृतमपिप्रवाहंश्रोत्रंदूरस्तावात विप्रकर्षात्तनुंअल्पमानेनगुणसाम्यंप्रेक्षिष्यंतेदृष्टि
ष्यंति किंलयाऽरूपंयथास्यादेवंतथाहृष्टीः दृशःआवर्ज्यप्रसार्यःयतोमदद्पिदवीयदेशवर्त्तिवस्तुस्तोकमिवप्रतिभाति॥ कसतित्वयित्वति
जलंतोयंदातुंप्रवृद्धिश्रवनतेलंबमानेसति। किंविशिष्टेत्वयि। सारंगिणः कृष्णस्यवर्णचौरिकांतिमुषिअमुनानीलच्छवौ तिःप्रवाहंक्षि
मिवाभुवः पृथिव्याः एकंअद्वितीयंमुक्तागुणमिवामुक्ताकलापमिव। हारमिवेति। किंविशिष्टंमुक्तागुणंस्थूलमध्येंद्रनीलंमदत्तमध्येःऽन्तःम
ध्येइन्द्रनीलंयस्यतं॥ धण्तामुत्तीर्येत्यादि॥ दशपुरगमनेनविलोकनकुतूहलंचउरतरुणीलोचनगोचरचारित्वंतोनोधस्यभुत्तगतांति
माननमारोपयन्नाह॥ हेमेघतांचर्मन्वतीनदीउत्तीर्यअतीत्यदृक्तप्रयाहि। त्वंकिंकुर्वन्। आत्मबिंबंआत्मीयप्रतिबिंबंदशपुरवधूनेत्रकोत्
पलानांदशपुरास्तिथासननगरीलोचनाश्चर्यविलोकितानांपात्रीकुर्वन्विषयतांनयन्। किंलतानांदशपुरवधूनेत्रकोत्पलानां। परिपरित
श्चलताविनमाणां॥ परिवितानागरिकावत्अस्यांस्थिल्पलतानांत्स्नवतीनांविस्तमावेलाशाख्येभ्लेषंतथाप्लुतानां। पुनःकिंलतानां॥ उपरिवि
लसत्कृष्णसारप्रभाणां। उपरिउपरिष्टात्विलसंतीस्फुरंतीकृष्णसारांकालीभवलाअघवीकृष्णेनसाराकर्बुराप्रभावदातान्तांकांतिर्ये
षांतेतेषां। कस्मात्पक्षोत्क्षेपात्। पक्ष्माणिहृणिपक्ष्मरोमाणिउपक्षेपःउदंचनंतस्मात्पुनःकिंलतानां॥ कुंदाक्षेपानुगमधुकरश्रीमुषां। कुंद
स्यकुसुमस्याक्षेपःविक्षेपःतस्यअनुगाअनुगामिनोमधुकरामधुलिहःतेषांयाशोभातांमुष्णंतिहरंतियानितेषांचौर्यमाणांकुंदकुसुमा
नेमारिल्लमरविलमत्तमिवध्वंसअवधानचुकुंदानामवदातत्वात्अलीनावलीतयालोचनानामिदंरूपंसंभवति। कथंभूतानांत्
द्विलोकनानांसाहृत्यं। अत्रक्रियाक्रियावतारस्तेदोपचारज्ञात्विस्ममास्तिथानेनतद्दलनेत्राणिगम्यते॥ पं ब्रह्मावर्त्तमित्यादि॥ पयो
दवापविचोदशादेशास्पर्शेनेनअयेलातसुपदिशन्नाह॥ हेमेघंतत। प्रसिद्धंकौरवंकुरूणामिदंकौरवंदेत्वंकुरुक्षेत्रंतदेषाःआप्य

३ ४ अत्रोपमालंकार ४४

येषां किं विशिष्टे कौरवं क्षेत्रं ब्रह्मावर्त्तं जनपदं सरस्वतीदृषद्वत्योः सरितोः अंतरालवर्तिनं किं कुर्वन् अध्यायया अध्युत्तान् प्रतिबिंबितं
अत्रछायया गाहमानः अनुभवन् पुनः किं विशिष्टे कुरुक्षेत्रे क्षत्रक्षयपिशुने क्षत्राणां क्षत्रियाणां क्षयं नाशः अयोधनं तस्य पिशुने सूचकं यत्र यस्मिन्
कुरुक्षेत्रे गांडीवधन्वा अर्जुनः राजन्यानां राज्ञां शितशरशतैः तीक्ष्णशायकनिकरैः मुखानि वदनानि अत्यस्यन् पिवन् अस्रवर्षत् गांडीवधन्वा कइव
यथा मेघः धारापातैः स्थलकमलविंडवर्षैः कमलानि यथा निश्चितं वसेत्स्यं सेतत् अत्रहिवाहालेत्यादि ॥ अतो धरस्यावर्त्तसि
दये च सिद्धतीर्थं च स्त्रानं बद्धत्वादि ॥ दसोऽप्यमपूत्वानपि अंतः शुद्धः मध्ये कल्मषरहितः सविताम्ब विषयसि ॥ किं विशिष्टः स्त्रं वर्णमात्रेण केवल
हिंकांताः ताः सक्तकालः किं कुर्वन् तां स्वापविरतयो सिद्धानां सारस्वतीनां सरस्वतीनदीसंबंधिनां अर्था रस्त्वत्या अत्रः सारस्वत्सः तासां तथा विधानां
अपांजलानां अनिगमसंबंधं रुचिर्विधायया अप लांगलावलिसंज्ञः सिवेवेत्तेदे ॥ किं भूतो लांगली समरविमुखः संग्रामपराङ्मुखः कया बंधु
धुनीसोबंधूनां संबंधिनी कुरु षोडषानां स्नेहेन ॥ किं रुचिः अतिसतरसां असी इच्छावंद्वालंमदिरा हिवालक्ता ॥ किं भूतां हालां रेवतीलोकनां
कं ॥ मुशालिनो लायतिस्थानलांछनः नेत्रैः अंकितां विकिताम् ॥ परतस्मात् रवरित्यादि ॥ इदे रमघतस्मात्स्थानात् उक्तो कन्या जाह्नवी गंगा वंगड्वे बृद्धे
किंसखा अत्रुकनखलं पत्रिकनखलं तीर्थं लक्ष्मीरूपा ॥ किं विशिष्टां उक्तो कन्यां स्त्रोलराजावतीर्णां शैलराजात् अवतीर्णां शैलराजाचतीर्णांतां
शैलराजावतीर्णां ॥ हिमवतः रहवलां हिमवतो गंगा प्रवदति रतिम्रुति ॥ पुनः कथं भूतां जाह्नवी सगरतनयस्वर्गसोपानपंक्तिं सगरो नाम नृपाति पती
तस्य तनयानां षष्टिसहस्रसंख्यानां स्वर्गसोपानपंक्तिरारोहणश्रेणिं ॥ सस्याः पायरूतबालादौ ॥ किं तत् कपिलकोपानलेधनी हतस्रवेय पाताले त
समसा जाता इस सत्रस्त गवश्चार्गरस्थानी तनि पक्षगायः झावितसमसा जावितातः त्रिदिवमारुरुक्षुः पुनः किं भूतां गोरी वक्त्रभ्रुकुटिरव
ना ॥ गौरीगिरिजातद्वत्रीतस्या व ज्रकवदनेस्वकुटिकोपावेशात् स्वकुटिः कुटिलता तस्या रचना घटना तां तथा भूतां यारासोह रस्यकेशग्रहणं
अकरोत् विकरधारणं चकार ॥ किं भूता या इंदुलमोर्मिहस्ता इंदो चंद्रमसि लग्ना ऊर्मयः एव हस्ता यस्याः सातथा भूता ॥ पर तस्याः पांडुमिल्यादि
॥ द्देमघयदि चेत्त्वं तस्याः गंगायाः अस्तः पानीयं पातुं गदीत तर्कये अतिलषे किं विशिष्टं अंलः अच्छस्फटिकविशदं स्वच्छस्फटिकवत् निर्मलं ॥ किं
भूतं त्वं श्वर्वाधलंबी सर्वाद्धेन अग्रिमभागेन लंबते यस सर्वार्धलंबी ॥ किं कर्त्र तिर्यङ् आवरोश सुरगजइवपैरावणस्ता याः पैरावणः स्वर्गगंगा

अत्रानुमाना लंकारः ४

अत्रोत्प्रेक्षा लंकारः ४२